दिनाङ्क :-07.10.2025

प्रात: - 06:55

## बिहार- निर्वाचन-आयोग

बिहार-विधानसभायाः निर्वाचनं अस्मिन् वर्षे द्वयोः चरणयोः क्रमशः नवम्बरमासस्य षड्दिनाङ्के एकादशदिनाङ्के च भविष्यति सहैव मतगणना नवंबरमासस्य चतुर्दशदिनाङ्के भविष्यति । निर्वाचनायोगेन ह्यः त्रिचत्वारिंशदुत्तर-द्विशतं सदस्यभूताय बिहार-विधानसभा-निर्वाचनाय मतदान-कार्यक्रमस्य घोषणा कृता अस्ति। निर्वाचन-कार्यक्रमस्य घोषणया सह एव बिहारे आदर्शाचार-संहिता प्रख्यापिता अस्ति । ह्यः नवदिल्ल्यां वार्ताहरान् सम्बोधयन् मुख्य-निर्वाचनायुक्तः ज्ञानेशकुमारः अकथयत् यत् राज्ये त्रिचत्वारिंशदुत्तर-सप्तकोटि-संख्याकेभ्यः मतदातृभ्यः द्वादशोत्तर-सप्तशताधिक-नवतिसहस्र-संख्याकानि मतदानकेन्द्राणि निर्मितानि भविष्यन्ति।

सः प्रोक्तवान् यत् प्रथमचरणस्य मतदानाय अधिसूचना अस्य मासस्य दशमदिनाङ्के प्रकाशिता भविष्यति सहैव प्रत्याशिनः सप्तदशदिनाङ्कं यावत् नामाङ्कनं कर्तुं शक्ष्यन्ति । द्वितीय-चरणस्य निर्वाचनाय अधिसूचना अस्य मासस्य त्रयोदश-दिनाङ्के प्रकाशिता भविष्यति विंशति-दिनाङ्कं यावत् च प्रत्याशिनः नामाङ्कनं विधातुं शक्नुवन्ति । मुख्य-निर्वाचनायुक्तः अकथयत् यत् प्रथमवारं प्रत्येकस्मिन् निर्वाचनक्षेत्रे एकः सामान्यपर्यवेक्षकः प्रयोजयिष्यते यः आयोगस्य सञ्जयो भूत्वा कार्यं करिष्यति । श्री-कुमारः अकथयत् यत् निर्वाचनप्रक्रियायाः गहननिरीक्षणाय सर्वेषु मतदानकेन्द्रेषु वेबकास्टिंग इति एतत् आयोजयिष्यते। सः पुनः प्रोक्तवान् यत् जनपदाधिकारिणः आरक्ष्याधीक्षकाः च कीदृश्यः अपि हिंसाघटनाः न सोढुं निर्दिष्टाः सन्ति । सः इदमपि अकथयत् यत् आयोगः राज्ये पर्याप्त-केन्द्रीय-सशस्त्र-आरक्षि-बलानां सन्धानं करिष्यति सहैव मादकपदार्थानां अनैतिकधनस्य च व्रजनाव्रजनं प्रति निरीक्षणं करिष्यति ।

## प्रधानमन्त्री-मोबाईल काङ्ग्रेस-:

प्रधानमन्त्री नरेन्द्रमोदी श्वः राष्ट्रिय-राजधान्यां एशिया-प्रीमियर्-टेलिकाम्-एण्ड्-टेक्- इति कार्यक्रमस्य, पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य इण्डिया-मोबाईल-काङ्ग्रेस् (आई. एम्. सी.) इत्यस्य उद्घाटनं करिष्यति। नवदिल्ल्याः यशोभूमि-सम्मेलनकेन्द्रे अक्टोबर्-मासस्य अष्ट तः एकादश दिनाङ्कपर्यन्तं चतुर्दिवसीयः महा-कार्यक्रमः भविष्यति।

कार्यक्रमस्य विषयः "परिवर्तनाय नवाचरः" इति अस्ति, तथा च पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य आई. एम्. सी. इत्यस्य उद्देश्यं दूरसञ्चारस्य तथा डिजिटल-तन्त्रज्ञानस्य क्षेत्रेषु आत्मनिर्भरतायाः, आत्मनिर्भरभारतस्य च प्रोत्साहनम् अस्ति। अस्मिन् सम्मेलने 6जी-इकोसिस्टम्, साईबर्-सुरक्षा, उपग्रह-सम्प्रेषणं, कृत्रिम बुद्धिमत्ता, इण्टर्नेट्-आफ्-थिङ्ग्स्, दूरसञ्चार-विनिर्माणम् इत्यादीनि प्रमुखानि

क्षेत्राणि केन्द्रिताः भविष्यन्ति। आगामि- पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य इण्डिया-मोबाईल-काङ्ग्रेस कार्यक्रमात् पूर्वम्, केन्द्रीय-सञ्चार-मन्त्री ज्योतिरादित्य-एम्. सिन्धिया-वर्यः ह्यः अन्तिम-सज्जतायाः समीक्षायै द्वारका-स्थितस्य यशोभूम्यां संप्राप्तवान्। संचारमन्त्रालयस्य अनुसारं, अस्मिन् कार्यक्रमे सार्धैकलक्ष-तोप्यधिकाः आगन्तुकाः, सप्तसहस्र तः अधिकाः वैश्विकप्रतिनिधयः, चतुःशत-तोप्यधिकाः प्रदर्शकाः च सम्मिलिताः भविष्यन्ति।

## उपराष्ट्रपतिः सी. पी. राधाकृष्णन्

उपराष्ट्रपतिः तथा राज्यसभायाः सभापतिः सी. पी. राधाकृष्णन् वर्यः अद्य विपक्ष-दलैः सह विभिन्नानां दलानां सदननेतृभिः सह मेलनं करिष्यति। निर्वाचितप्रतिनिधिभिः सह उच्चसदनस्य अध्यक्षत्वेन तस्य प्रथमः औपचारिकः संवादः भविष्यति। एषा सभा संसदः शीतकालीन सत्रात् प्राक् अस्ति, यस्य आरम्भः अग्रिमे मासे भवितुम् अर्हति। उपराष्ट्रपति-वर्यस्य औपचारिक उपवेशने आगामि-सत्रावधौ सदननेतृभिः सह सदने सुकरकार्याचरणाय चर्चापि भवितुम् अर्हति।